**SA-II**

**विषय : संस्कृतम्**

**कक्षा : VIII**

**अवधि : होरात्रयम्** **पूर्णाङ्काः : 80**

*निर्देशाः (i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।*

*(ii) प्रतिखण्ड-उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।*

*(iii) प्रत्येकं खण्डं अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(iv) प्रश्नपत्रे उत्तराणि न लेखनीयानि।*

*(v) प्रश्नसंख्या प्रश्नापत्रानुसारं अवश्यमेव लेखनीया।*

*(vi) सर्वेषां प्रश्नानां उत्तराणि संस्कृतेन लेखनीयानि।*

**खण्डः 'क' (अपठित–अवबोधनम्)** **अंकाः 10**

प्र1. अधोलिखितम् अनुच्छेदम् पठित्वा प्रदत्तप्रश्नानां उत्तराणि लिखत -

जनाः प्रायः स्वार्थपरायणाः सन्ति। परेषां उपकाराय ते धनादिकं न वितरन्ति। विरलाः दाने प्रीतिं दर्शयन्ति। किन्तु नद्यः तरवः मेघाः च परोपकाराय एव जीवन्ति। जलेन पूर्णाः नद्यः मानवहिताय वहन्ति। ताः स्वजलं स्वयं न पिबन्ति। तथैव वृक्षाः अपि स्वफलानि स्वयं न खादन्ति। खगाः, पशवः मनुष्याः च वृक्षाणां फलानि भक्षयन्ति। इत्थं छायावन्तः वृक्षाः अपि परोपकाराय स्थिताः सन्ति। मेघाः समुद्रस्य क्षारं जलं पिबन्ति। किन्तु मधुरं जलं भुवनाय प्रयच्छन्ति। जलस्य वर्षणेन विविधानि सस्यानि उद्भवन्ति यैः सर्वे जीवाः जीवन्ति। एवमेव सत्पुरुषाः अपि परोपकाराय जीवन्ति। सज्जनानां सम्पत्तिः परेषां दुःखनिवारणाय एव। सन्तः स्वार्थं त्यजन्ति परमार्थं च भजन्ति। ते लोकानां कल्याणाय सर्वस्वं समर्पयन्ति। उक्तं च - परोपकाराय सतां विभूतयः।

I. एकपदेन उत्तरत - (½x4=2)

(i) केन पूर्णाः नद्यः मानवहिताय वहन्ति?

(ii) प्रायः जनाः कीदृशाः सन्ति।

(iii) केषां सम्पत्तिः परेषां दुःखनिवारणाय अस्ति?

(iv) के स्वफलानि स्वयं न खादन्ति?

II. पूर्णवाक्येन उत्तरत - (2x2=4)

(i) मेघाः किं पिबन्ति?

(ii) के के परोपकाराय जीवन्ति?

III. यथानिर्देशम् उत्तरत - (½x4=2)

(i) 'ताः स्वजलं स्वयं न पिबन्ति' अत्र 'पिबन्ति' क्रियापदस्य कर्तृपदं किम् अस्ति?

(ii) 'मधुरं जलं' अनयोः पदयोः विशेषणपदं किम् अस्ति?

(iii) 'वृक्षाः' अस्य किं पर्यायपदम् अत्र प्रयुक्तम्?

(iv) 'स्वार्थं' अस्य किम् विलोमपदम् अत्र प्रयुक्तम्?

IV. अस्य गद्यांशस्य कृते समुचितं शीर्षकं लिखत। (2)

**खण्डः 'ख' (रचनात्मकं कार्यं)** अंकाः 15

प्र2. भवतः नाम समीरः अस्ति। भवान् च चण्डीगढ़-नगरे वसति। नवदिल्लीस्थितं मित्रं स्वविद्यालयस्य वार्षिकोत्सवं वर्णयन् लिखितं एतत् पत्रम् मञ्जूषायां प्रदत्तैः उचितपदैः पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत - (½x10=5)

| मञ्जूषा |
|---|
| प्रस्तुता, सुसज्जितः अहम्, नमस्ते, कुशलं, अवसरे, समीरः, शिक्षानिर्देशकः, कन्यायाः, चण्डीगढ़-नगरात् |

(1)______

दिनांकः______

प्रिय मित्र परमेश,

सस्नेहं (2)________।

अत्र (3)________ तत्रास्तु। अस्मिन् पत्रे (4)________ स्वविद्यालयस्य वार्षिकोत्सवस्य वर्णनं करोमि। अस्मिन् (5)________ मम विद्यालयः पत्रलताभिः (6)________ आसीत्। (7)________ महोदयः समारोहस्य मुख्यातिथिः आसीत्। छात्रैः एका लघुनाटिका (8)________। एकस्याः (9)________ नृत्यम् अपि अभवत्। मुख्यातिथिमहोदयेन पुरस्काराणां वितरणम् अपि कृतम्। शेषं मिलित्वा कथयिष्यामि।

भवतः मित्रम्

(10)________

प्र3. अधः प्रदत्तं चित्रम् आधृत्य मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चसंस्कृतवाक्यानि लिखत - (2x5=10)

| मञ्जूषा |
|---|
| नद्यां, कूपः, कर्षति, कुरुतः, उत्पतन्ति, स्नानं, नारी, शिरसि, घटः, खगाः, मन्दिरं, पताका, कुटीरं, ग्रामस्य |



## खण्डः 'ग' (अनुप्रयुक्त-व्याकरणम्) अंकाः 25

प्र4. अधोलिखितवाक्येषु रेखांकितपदानां सन्धिच्छेदं सन्धिं वा कृत्वा पुनः पूर्णवाक्यं लिखत - (1x3=3)

(i) इदं पुस्तकं मम + एव अस्ति।

(ii) सैनिकः भो + अनम् प्रति गच्छति।

(iii) गायकः गीतम् गायति।

प्र5. मञ्जूषातः उचित-अव्ययपदं चित्वा रिक्तस्थानम् पूरयत - (1x4=4)

| मञ्जूषा |
|---|
| इतस्ततः, उच्चैः, तत्र, परश्वः |

(i) __________ वयं जयपुरनगरं गमिष्यामः।

(ii) यत्र चिकित्सालयः __________ रुग्णाः।

(iii) रात्रौ कुक्कुराः __________ भ्रमन्ति।

(iv) __________ पाठं पठ।

प्र6. (क) अधोलिखितवाक्ययोः रेखांकितपदस्य प्रकृति-प्रत्ययौ पृथक्-पृथक् कृत्वा अथवा संयोज्य वाक्यानि पुनः लिखत - (1x2=2)

(i) माता हसित्वा पुत्रं पश्यति।

(ii) बालकः उत्थाय जलं पिबति।

(ख) (i) क्त्वा प्रत्ययं संयोज्य वाक्यसंयोजनं क्रियताम् - (1x2=2)

धनिकः निर्धनाय धनं ददाति। सः गच्छति।

(ii) ल्यप् प्रत्ययं संयोज्य वाक्यसंयोजनं क्रियताम् -

बालकः विद्यालयात् आगच्छति। सः भोजनं करोति।

प्र7. अधोलिखितवाक्येषु अंकानां स्थाने संख्यावाचक विशेषणैः रिक्तस्थानानि पूरयित्वा पुनः लिखत - (1x3=3)

(i) शीतावकाशे वयं (51) __________ छात्राः भ्रमणाय अगच्छन्।

(ii) उद्याने (75) __________ पुष्पाणि विकसन्ति।

(iii) संस्कृतविषये मम (90) __________ अंकाः सन्ति।

प्र8. उचितशब्दरूपैः रिक्तस्थानानि पूरयित्वा वाक्यानि पुनः लिखत - (1x4=4)

(i) हे __________! अहं प्रणमामि। (राजन्)

(ii) __________ आश्रमं प्रति गच्छति। (मुनि)

(iii) __________ कक्षायां बालिकाः पठन्ति। (इदम् - सप्तमी विभक्तिः, एकवचनम्, स्त्री.)

(iv) तस्य __________ समीपे मम पुस्तकम् अस्ति। (मातृ - षष्ठी विभक्तिः, एकवचनम्)

प्र9. उचितधातुरूपैः रिक्तस्थानानि पूरयित्वा वाक्यं पुनः लिखत - (1x4=4)

(i) यूयम् अग्निना भोजनं __________। (पच् - लोट् लकारे)

(ii) उद्याने अनेके जनाः __________। (अस्)

(iii) श्वः वयं जन्तुशालां ____________ । (दृश्)

(iv) सः तत्र गत्वा ____________ । (नृत् - विधिलिंग लकारे)

प्र10. निम्नवाक्यानि शुद्धं कृत्वा पुनः लिखत - (1x3=3)

(i) अत्र एका चक्रम् भ्रमति।

(ii) एषः बालिका कुत्र गच्छति?

(iii) अहं उद्याने भ्रमसि।

## खण्डः 'घ' (पठित–अवबोधनम्)

अंकाः 30

प्र11. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानां उत्तराणि लिखत - (5)

समाजे नूतनानां विचाराणां स्वीकारे प्रायः सामान्यजनाः काठिन्यमनुभवन्ति। भारतीयज्योतिःशास्त्रे तथैव आर्यभटस्यापि विरोधः अभवत्। तस्य सिद्धान्ताः उपेक्षिताः। स पण्डितम्मन्यानाम् उपहासपात्रं जातः। पुनरपि तस्य दृष्टिः कालातिगामिनी दृष्टा। आधुनिकैः वैज्ञानिकैः तस्मिन् तस्य च सिद्धान्ते समादरः प्रकटितः। अस्मादेव कारणाद् अस्माकं प्रथमोपग्रहस्य नाम आर्यभट इति कृतम्।

I. एकपदेन उत्तरत - (½x2=1)

(i) कस्य नाम 'आर्यभट' इति कृतम्?

(ii) तस्य के उपेक्षिताः?

II. पूर्णवाक्येन उत्तरत - (1x2=2)

(i) कैः तस्मिन् तस्य च सिद्धान्ते समादरः प्रकटितः?

(ii) समाजे केषां स्वीकारे प्रायः सामान्यजनाः काठिन्यमनुभवन्ति?

III. यथानिर्देशम् उत्तरत - (½x4=2)

(i) 'आधुनिकैः वैज्ञानिकैः' अनयोः पदयोः विशेष्यपदं किम्?

(ii) 'नवीनानां' अस्य किम् पर्यायपदम् अत्र प्रयुक्तम्?

(iii) 'निरादरः' अस्य किम् विलोमपदम् अत्र प्रयुक्तम्?

(iv) 'अनुभवन्ति' क्रियापदस्य कर्तृपदम् किम्?

प्र12. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत - (5)

शनैर्यदि यामि चिररात्राय विलपिष्यति गृहे बालः।
द्रुतं यदि यामि वसनं मे भवेदार्द्रं सलिलवेगैः॥

I. एकपदेन उत्तरत - (½x2=1)

(i) कः विलपिष्यति?

(ii) बालः कुत्रास्ति?

II. पूर्णवाक्येन उत्तरत - (2x1=2)

जलवाहिनी यदि द्रुतं गच्छेत् तर्हि किं स्यात्?

III. यथानिर्देशम् उत्तरत - (½x4=2)

(i) 'आर्द्रं वसनं' अनयोः पदयोः विशेषणपदं किम्?

(ii) 'वस्त्रम्' अस्य किम् पर्यायपदम् अत्र प्रयुक्तम्?

(iii) 'द्रुतम्' अस्य किम् विलोमपदम् अत्र प्रयुक्तम्?

(iv) 'गच्छामि' इत्यर्थे किं पदम् अत्र प्रयुक्तम्?

प्र13. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानां उत्तराणि लिखत - (5)

(काश्चन बालिकाः भ्रमणाय निर्गताः परस्परमालपन्ति)

रिपञ्वी - परमिन्दर्! परमिन्दर्! एहि आगच्छ, उपवनं प्रविशामः।

परमिन्दर् - अरे! उपवनस्य द्वारे एव प्लास्टिकस्यूतकानि क्षिप्तानि इतस्ततः विकीर्णानि।

कचनार् - जनाः प्रमादं कुर्वन्ति। प्लास्टिकपुटकेषु खाद्यवस्तूनि गृहीत्वा भक्षयन्ति परं तानि पुटकानि मार्गे यत्र कुत्रापि क्षिपन्ति।

रोजालिन् - इयं महती समस्या। अपि प्रविशामः?

रिपञ्वी - अस्तु प्रविशामः।

(सर्वाः उपवने प्रविशन्ति।)

I. एकपदेन उत्तरत - (½x2=1)

(i) जनाः मार्गे किं क्षिपन्ति?

(ii) सर्वाः कुत्र प्रविशन्ति?

II. पूर्णवाक्येन उत्तरत - (1x2=2)

(i) जनाः कानि गृहीत्वा भक्षयन्ति?

(ii) उपवनस्य द्वारे कानि विकीर्णानि?

III. यथानिर्देशम् उत्तरत - (½x4=2)

(i) 'तानि पुटकानि' अनयोः पदयोः विशेषणपदं किम्?

(ii) 'गच्छ' अस्य किम् विलोमपदम् अत्र प्रयुक्तम्?

(iii) 'कुर्वन्ति' क्रियापदस्य कर्तृपदं किम्?

(iv) 'खादन्ति' अस्य किम् पर्यायपदम् अत्र प्रयुक्तम्?

प्र14. अधोलिखित-श्लोकस्य अन्वयं उचितपदक्रमेण पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत - (1x4=4)

गिरिशिखरे ननु निजनिकेतनम् विनैव यानं नगारोहणम्।

बलं स्वकीयं भवति साधनम्, सदैव पुरतो निधेहि चरणम्॥

अन्वयः - ननु निजनिकेतनम् (i) __________ यानं विना एव नगारोहणम्। स्वकीयं (ii) __________ साधनं (iii) __________ सदैव (iv) __________ पुरतः निधेहि।

प्र15. अधोलिखितवाक्येषु रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत - (1x4=4)

(i) तत्र गत्वा जलं भृत्वा आनय।

(ii) पृथिवी स्थिरा वर्तते।

(iii) प्रेमलः काष्ठानि प्रज्ज्वालय अपृच्छत्।

(iv) प्रेमली प्रेमलस्य पत्नी आसीत्।

प्र16. अधोलिखितवाक्यानि घटनाक्रमानुसारेण पुनः लिखित - (½x8=4)

(i) सः हण्डीं स्नानगृहे अस्थापयत्।

(ii) प्रेमलः स्नानाय उष्णम् जलम् इच्छति।

(iii) सः अवदत् - अहम् अग्रे आलस्यं न करिष्यामि।

(iv) एकः प्रेमलः आसीत् एका च प्रेमली आसीत्।

(v) सः स्नानम् अकरोत्।

(vi) प्रेमलः स्नात्वा अवदत् - पुष्पमिव शरीरं लघु जातम्।

(vii) सः घटे जलम् अभरत्।

(viii) प्रेमलः हण्डीं चुल्ल्याम् अस्थापयत्।

प्र17. अर्थैः सह शब्दानाम् मेलनं कृत्वा पुनः उत्तरपुस्तिकायाम् लिखत - (½x6=3)

| शब्दाः | अर्थाः |
|---|---|
| झटिति | निरन्तरम् |
| सलिलं | अधुना |
| सततम् | शीघ्रम् |
| घटम् | संसारे |
| सम्प्रति | कुम्भम् |
| लोके | जलं |